# दिल्ली पब्लिक स्कूल
## सेल टाउनशिप, राँची
### वार्षिक परीक्षा (2017-18)

कक्षा– नवमी | विषय–संस्कृतम्
समय–3 घंटा | पूर्णांक–80

---

निर्देषाः
प्रष्नपत्रे चत्वारः खण्डाः सन्ति।
खण्डः (क) अपठित –अवबोधनम्–10 अंकाः
खण्डः (ख) रचनात्मक–कार्यम्–15 अंकाः
खण्डः (ग) अनुप्रयुक्त– व्याकरणम् – 25 अंकाः
खण्डः (घ) पठित– अवबोधनम्–30 अंकाः

---

## खण्डः (क)
## अपठित –अवबोधनम्–10 अंकाः

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रष्नानाम् उत्तराणि लिखत –

विद्या मानवस्य तृतीयं ज्ञानुचक्षुः। अनया मानवः नीरक्षीर विवेकी भवति। विद्यादीपेन अज्ञानान्धकारो विनष्यति। धर्माधर्मयोः विद्याऽविद्ययोः च विवेचनं सुकरं भवति। विद्यया एव मानवः प्रगतेः षिखरम् आरोढुं षक्नोति। षिक्षा यथा पुरूषेभ्यः श्रेयस्करी विद्यते, तथैव स्त्रीभ्योऽपि षिक्षायाः महती आवष्यकता भवति। अषिक्षिता नारी तु पुरूषस्य वास्तविकता सहायिका भवितुं नार्हति। नार्याः समाजे महत्त्वपूर्णं स्थानम् अस्ति। यो हस्तः षिषुदोलां चालयति स एव संसारोपरि षासनं करोति। इदं कथनं अक्षरषः सत्यम्। माता यादृषी भवति संततिः अपि तादृषी एव , यदि मातरः अषिक्षिताः विद्याहीनाः कर्तव्यज्ञान–षून्या च सन्ति तर्हि तासां सन्ततयोऽपि तथैव बुद्धिविहिनाः मूर्खाः च भविष्यन्ति। यदि नार्यः षिक्षिताः सन्ति तर्हि ताः स्वपुत्राणां पालनं षिक्षणं च सुचारूरूपेण करिष्यन्ति।

**I.** एकपदेन उत्तरत – **[1x2=2]**

(i) मानवस्य ज्ञानचक्षुः किम्?

(ii) कीदृषी नारी पुरूषस्य सहायिका भवितुं नार्हति?

**II.** पूर्णवाक्येन उत्तरत – **[1x2=2]**

(i) किं कथनम् अक्षरषः सत्यम्?

(ii) केन कारणेन सन्ततयः बुद्धिहीनाः मूर्खाः च भविष्यन्ति?

**III.** निर्देषानुसारम् उत्तरत– **[1x4=4]**

(i) 'नेत्रम' इति पदस्य अत्र किं पर्यायपदम्?

(क) तृतीयं (ख) ज्ञानम् (ग) चक्षुः (घ) षिक्षितम्

(ii) यो हस्तः षिषुदोलां चालयति................ षासनं करोति' इत्यत्र विषेष्यपदं किम्?

(क) षिषुदोलायां (ख) हस्तः (ग) सः (घ) यो

**(iii)** 'षक्नोति' इति क्रियापदस्य कर्तृपदं किम्?

(क) विद्यया (ख) मानवः (ग) प्रगतेः (घ) षिखरम्

**(iv)** 'यादृषी' अस्य पदस्य अनुच्छेदे कः विलोमः?

(क) तादृषी (ख) यदि (ग) तर्हि (घ) विद्यते

**(v)** अस्य अनुच्छेदस्य कृते समुचितं षीर्षकं लिखत। **[2]**

<u>खण्डः (ख)</u>

रचनात्मक–कार्यम्–15 अंकाः

**2.** भवतां नाम सौम्यः। भवतां विद्यालये वन–महोत्सवः आयोज्यते। तस्य वर्णनम् अधिकृत्य मित्रं भावेषं प्रति लिखिते पत्रे मंजूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत **[½x10=5]**

**(i)** ........................

दिनांकः ..............

प्रिय मित्र **(ii)** .....................

**(iii)** .....................

हयः एव अस्माकं विद्यालये **(iv)** ..........सम्पन्नः जातः सत्यम् अयं तु **(v)** ..........एव आसीत्। छात्राः न केवलं विद्यालयस्य **(vi)** ..........वृक्षारोपणं कृतवन्तः अपितु तैः **(vii)** ..........बहिः **(viii)** ..........अपि वृक्षाः

रोपिताः। यदि सर्वे विद्यालयाः एवं करिष्यन्ति तर्हि अस्माकं देषस्य षीघ्रमेव **(ix)** ..........उन्नतिः च भविष्यतः।

भवदीयम् अभिन्नहृदयम्

**(x)** .......................

| वनमहोत्सवः, सप्रेम नमस्ते, भावेष, अभूतपूर्वम्, विकासः, विद्यालयात्, हरिद्वारतः, उद्याने, सौम्य, मार्गेषु |
|---|

**3.**

## <u>खण्डः (ग)</u>

अनुप्रयुक्त– व्याकरणम् – 25 अंकाः

**4.** समुचितेन वर्णविन्यासेन रिक्तस्थानानि पूरयत **[1x2=2]**

**(i)** पर्यटनम् – प्+अ+.........+य्+अ+ट्+अ+न्+अ+म्

**(ii)** व्+य्+अ+व्+अ+स्+थ्+आ+प्+य्+अ =.............................

**5.** अधोलिखितानां प्रष्नानाम् उत्तरणी लिखत– **[1x3=3]**

**(i)** 'व्' वर्णस्य उच्चारणस्थानम् किम्?

(क) दन्तोष्ठम् (ख) तालु (ग) कण्ठतालु (घ) मूर्घा

**(ii)** 'न्यवेदयत्' – इति पदे तालव्यं वर्णं लिखत –

**(iii)** भ्– वर्णस्य उच्चारणस्थानं लिखत

**6.** अधोलिखित–वाक्येषु रेखांकितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत **[1x4=4]**

**(i)** षिषुं दृष्ट्वा माता <u>उल्लसिता</u> जाता।

**(ii)** <u>अद्य+अस्माकं</u> परीक्षा अस्ति।

**(iii)** सागरे <u>लघूर्मि</u> दृष्यते।

**(iv)** अक्रोधः + तपसः

**7.** उचितैः षब्दरूपैः रिक्तस्थानानि पूरयत – **[1x4=4]**

**(i)** गृहे .............. बालकानां मुखं विभति। (गच्छत्)

**(ii)** .............. वाटिकायां पुष्पाणि विकसन्ति। (तत्)

**(iii)** .............. सर्वत्र आदरः भवति। (विद्वस्)

**(iv)** मम – नाम रचना अस्ति। (भगिनी)

**8.** उचितैः धातुरूपैः वाक्यानि पूरयत – **[1x4=4]**

**(i)** ते सर्वदा स्वकार्यं परिश्रमेण ..................... (कृ–लट्)

**(ii)** यूयं गुरूं .................। (सेव्–लृट्)

**(iii)** सर्वे जनाः निरामयाः .....................। (अस्–विधिलिंग)

**(iv)** बालकेभ्यः अध्ययनं ...................। (रूच्–लोट्)

**9.** उचित उपपदविभक्तीनां प्रयोगेन रिक्तस्थानानि पूरयत – **[1x4=4]**

**(i)** .....................अधः केचन् जनाः तिष्ठन्ति। (वृक्ष)

**(ii)** मम.....................निकषा तडागः अस्ति। (विद्यालय)

**(iii)** ........... न विष्वसेत् (दुष्टयानम्)

**(iv)** मूर्खः .................. प्रमाद्यते। (जागरणम्)

**10.** रेखांकितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत

**(i)** सः मृतं पुत्रं <u>निरीक्ष्य</u> विषादम् अगच्छत्। **[1x4=4]**

**(ii)** सूदः भोजनं <u>पक्तुम्</u> .........+.......... पाकषालां प्रविषति।

(iii) अस्माभिः गीता – <u>पठ्+क्त</u>

(iv) ताः पत्राणि ............. <u>लिख्+क्तवतु</u>

## <u>खण्डः (घ)</u>

### पठित– अवबोधनम्–30 अंकाः

**11.** अधोलिखतं गद्यांषं पद्यांषं नाट्यांषं च पठित्वा प्रदत्त प्रष्नानाम् उत्तराणी लिखत

(अ) किन्तु बालस्य अत्र रक्षकः नास्ति। तत् किं करोमि? भवतु चिरकालपालितमिमं पुत्रनिर्विषेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि तथा कृत्वा गतः। ततस्तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पो दृष्टः। स तं व्यापद्य खण्डषः कृतवान्। अत्रान्तरे ब्राहमणोऽपि श्राद्धं गृहीत्वा गृहमुपावृतः। ब्राहमणम् दृष्ट्वा नकुलः रक्त विलिप्तप्रमुखपादः तस्य चरणयोः अलुठत्। विप्रस्त्थाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान्।

**I.** एकपदेन उत्तरत – **[1x2=2]**

(i) कः ब्राह्मणस्य चरणयोः अलुठत्?

(ii) नकुलेन कः दृष्टः?

**II.** पूर्णवाक्येन उत्तरत – **[1x2=2]**

(i) ब्राह्मणः किं कृत्वा श्राद्धार्थं गतः?

(ii) रक्तविलिप्तप्रमुखपादः नकुलं दृष्ट्वा ब्राह्मणः किम् अवगछति?

**III.** निर्देषानुसारम् उत्तरत– **[½x4=2]**

(i) सः तं व्यापाद्य खण्डषः कृतवान्। अत्र कर्तृपदं किम्?

(क) सः (ख) खण्डषः (ग) तम् (घ) कृतवान्

(ii) 'निष्चित्य' इत्यर्थे किं पदं प्रयुक्तम्?

(क) व्यापाद्य (ख) अवधार्य (ग) खादितः (घ) उपसर्पन्

(iii) 'विप्रस्त्थाविधं तं दृष्ट्वा अत्र तम् पदम् कस्मै प्रयुक्तम्?

(क) ब्राह्माणाय (ख) बालकाय (ग) सर्पाय (घ) नकुलाय

(iv) 'प्रसन्नः' इत्यस्य विपर्ययपदं किं प्रयुक्तम्?

(क) कोपः (ख) खण्डषः (ग) मृतः (घ) जातः

(आ) यानस्याङ्गं हरेः षस्त्रं चिह्नं भारतभूपतेः।
चलन्तं वर्तुलाकारं, यो जानाति स पण्डितः।।

**I.** एकपदेन उत्तरत – **[1x2=2]**

(i) कस्य अङ्गं चक्रम् अस्ति?

(ii) चक्रं कीदृषं भवति?

**II.** पूर्णवाक्येन उत्तरत – **[1x2=2]**

(i) कस्य चिह्नं चक्रम् अस्ति?

(ii) चक्रं यो जानाति सः कः अस्ति?

**III.** निर्देषानुसारम् उत्तरत – **[½x4=2]**

(i) 'जानाति' इति क्रियापदस्य कर्तृपदं किम्?

(क) यः (ख) सः (ग) षस्त्रं (घ) चिह्नम्

**(ii)** 'प्रजायाः' इत्यस्य पदस्य कः विपर्ययः?

(क) हरेः (ख) राजानम् (ग) भूपतेः (घ) प्रजा

**(iii)** 'विद्वान' इति पदस्य कः पर्यायः?

(क) यः (ख) षस्त्रं (ग) गुणः (घ) पण्डितः

**(iv)** 'सः' सर्वनामपदं कस्मै प्रयुक्तम्?

(क) दृष्ये (ख) षस्त्राय (ग) पण्डिताय (घ) अंगाय

(इ) इच्छामि भवद्भ्यः किंचित् दातुम्।

अष्टावक्रः प्रत्यवदत्–यदि भवान् इच्छति तदा
यद् वस्तु भवदीयम् अस्ति, तत् मह्यम् अर्पय।

| | |
|---|---|
| जनकः– | राज्यम् अर्पयामि? |
| अष्टावक्रः– | राज्यं भवदीयं नास्ति। एतत् वंषपरम्पराप्राप्तम् |
| जनकः– | धनं ददामि? |
| अष्टावक्रः– | धनं भवदीयं नास्ति। एतत् प्रजायाः सकाषात् आगतम्। |
| जनकः – | षरीरं प्रयच्छामि? |
| अष्टावक्रः– | आत्मा षरीरस्य अध्यक्षः न भवान्। |
| जनकः – | स्वकीयं मनः समर्पयामि। |
| अष्टावक्रः– | इदम् एव अस्तु। दीयतां मे स्वमनः |
| जनकः – | भगवान्! दत्तं मया स्वमनः भवते। सम्प्रति आदिषतु मां राजकार्याय |
| अष्टावक्रः– | कथं भवान् करिष्यति राजकार्यम्? भवतः मनः तु मम अधीनम्। मनसा षून्यः भवान् संकल्पविकल्यौ कर्तुं न अर्हति। |
| जनकः | (आत्मगतं) कीदृषीं दषां प्राप्तोऽहम्। षान्ते मनसि अपूर्वा आनन्दानुभूतिः |

**I.** एकपदेन उत्तरत – **[1x2=2]**

**(i)** आत्मा कस्य अध्यक्षः?

**(ii)** जनकस्य मनः कस्य अधीनम्?

**II.** पूर्णवाक्येन उत्तरत – **[1x2=2]**

**(i)** धनं कथं आगतम् आसीत्?

**(ii)** षान्ते मनसि का भवति?

**III.** निर्देषानुसारम् उत्तरत – **[½x4=2]**

**(i)** 'इच्छति' इति क्रियापदस्य कर्तृपदं किम्?

(क) ) भवान (ख) जनकः (ग) अष्टावक्रः (घ) मह्यम्

**(ii)** 'भवान्'इत्यस्य पदस्य अनुच्छेदे कस्मै प्रयुक्तम्?

(क) अष्टावक्राय (ख) जनकाय (ग) षरीराय (घ) धनाय

**(iii)** 'समीपात्' इत्यस्य पदस्य पर्यायः अनुच्छेदे किं प्रयुक्तः?

(क) प्रजायाः (ख) सकाषात् (ग) अष्टावक्राय (घ) एतत्

**(iv)** 'अहम्' इति कर्तृपदस्य क्रियापदम् किम्?

(क) षान्ते (ख) प्राप्तः (ग) दषां (घ) अपूर्वां

**12.** अधोलिखतष्लोकयोः अन्वययोः रिक्तस्थानानि पूरयत– **[½x8=4]**

(क) विष्वबन्धुत्वमुदघोषयत्पावनम्
विष्ववन्धैः चरित्रैर्जगत्पावयत्।
विष्वमेकं कुटुम्बं समालोकयत् भूतले भाति
मेऽनारतं भारतम्।।

अन्वयः **(i)** ................ विष्वबन्धुत्वम् उदघोषयत् **(ii)** ................ चरित्रैः जगत् **(iii)** ................ विष्वम् एकम्

**(iv)** ................ समालोकयत् मे भारतम् भूतले अनारतं भाति।

(ख) मूलं भुजङ्गैः षिखरं प्लवङ्गैः षाखा विहंगैः कुसुमानि मृगैः।

नास्त्येव तच्चन्दन पादपस्य यन्नाश्रितं सत्वभरैः समन्तात्।।

भुजंगैः मूलं **(v)** ..............षिखरं विहंगैः षाखा भृङ्गैः कुसुमानि (आश्रितानि) चन्दनपादपस्य

**(vi)** ..............न एव अस्ति यत् सत्वभरैः **(vii)** ..............न **(viii)** ..............।

| |
|---|
| समन्तात्, प्लवङ्गैः, पावनं , कुटुम्बं, तत्, विष्ववन्द्यैः, आश्रितम्, पावयत् |

**13.** रेखांकितपदानि आधृत्य प्रष्ननिर्माणं कुरूत **[1x4=4]**

**(i)** पाइथोगरस्य नाम सिद्धान्तः षुल्वसुत्रेषु निरूपितः।

**(ii)** राज्ञा हास्यकारणं पृष्टम्।

**(iii)** मम् पुत्राः गुणवन्तः क्रियन्ताम्।

**(iv)** धैर्येण स्वंत्रतायाः उपायाः चिन्तनीयाः ।

**14.** रेखांकितषब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत **[1x4=4]**

**(i)** ते स्मितम् अकुर्वन्।

(क) कोमलम् (ख) मन्ये (ग) अल्पहसितम्

**(ii)** वराकोऽयम् अभावेन खिद्यते।

(क) श्रेष्ठः (ख) राजपुत्रः (ग) दयनीयः

**(iii)** धर्ममोक्ष अन्वितम्।

(क) युक्तम् (ख) सहितम् (ग) रहितम्

**(iv)** पतिव्रतया सः मुनिः अभिहितः।

(क) दृष्टः (ख) उक्तः (ग) अधिक्षिप्तः